## समायाः खः। (८५/१७४९)

अधीष्टादयश्चत्वारोऽर्था अनुवर्तन्ते। समाशब्दाद् द्वितीयासमर्थाद् अधीष्टादिषु अर्थेषु खः प्रत्ययो भवति। ठञोऽपवादः। समामधीष्टो भृतो भूतो भावी वा समीनः। केचित् तु 'तेन निर्वृत्तम्' (५.१.७९/१७४३) [1]इति सर्वत्रानुवर्तयन्ति। समया निर्वृत्तः समीनः॥

## द्विगोर्वा। (८६/१७५०)

'समायाः खः' (५.१.८५/१७४९) इत्येव। [2]समाशब्दान्ताद् [3]द्विगोः निर्वृत्तादिषु अर्थेषु पञ्चसु वा खः प्रत्ययो भवति। पूर्वेण [4]नित्यः प्राप्तो विकल्प्यते। 'प्राग्वतेः सङ्ख्यापूर्वपदानां तदन्तग्रहणमलुकि' (७.३.१७/१६८३ वा.) इति प्राप्ति[5]रस्त्येव। [6]खेन मुक्ते पक्षे ठञपि भवति। द्विसमीनः, द्वैसमिकः। त्रिसमीनः, त्रैसमिकः॥

## रात्र्यहःसंवत्सराच्च। (८७/१७५१)

[7]रात्रि अहः संवत्सर इत्येवमन्ताद् द्विगोः[8]निर्वृत्तादिषु अर्थेषु वा खः प्रत्ययो भवति। खेन मुक्ते पक्षे [9]ठञपि भवति। द्विरात्रीणः, द्वैरात्रिकः। त्रिरात्रीणः, त्रैरात्रिकः। द्व्यहीनः, द्वैयह्निकः। त्र्यहीणः, त्रैयह्निकः। द्विसंवत्सरीणः, द्विसांवत्सरिकः। त्रिसंवत्सरीणः, त्रिसांवत्सरिकः। 'सङ्ख्यायाः संवत्सरसङ्ख्यस्य च (७.३.१५/१७५२) इत्युत्तरपदवृद्धिः॥

## वर्षाल्लुक् च। (८८/१७५३)

द्विगोः इत्येव। [10]वर्षान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति। पक्षे ठञ्। तयोश्च वा लुग् भवति। [11]एवं त्रीणि रूपाणि [12]भवन्ति। द्विवर्षीणो व्याधिः, द्विवार्षिकः, द्विवर्षः। त्रिवर्षीणः, त्रिवार्षिकः, त्रिवर्षः। 'वर्षस्याभविष्यति' (७.३.१६/१७५४) इत्युत्तरपदवृद्धिः। भाविनि तु [13]त्रैवर्षिकः॥

## चित्तवति नित्यम्। (८९/१७५५)

चित्तवति प्रत्ययार्थेऽभिधेये वर्षशब्दान्ताद् द्विगो[14]र्निर्वृत्तादिष्वर्थेषु उत्पन्नस्य प्रत्ययस्य नित्यं लुग् भवति। पूर्वेण विकल्पे प्राप्ते वचनम्। द्विवर्षो दारकः[15]। चित्तवति इति किम्? द्विवर्षीणो व्याधिः॥

## षष्टिकाः षष्टिरात्रेण पच्यन्ते। (९०/१७५६)

षष्टिकशब्दो निपात्यते। बहुवचनमतन्त्रम्। षष्टिरात्रशब्दात् तृतीयासमर्थात् कन् प्रत्ययो [16]निपात्यते पच्यन्ते इत्येतस्मिन्नर्थे, रात्रिशब्दस्य च लोपः। षष्टिरात्रेण पच्यन्ते षष्टिकाः[17]। सञ्ज्ञा एषा धान्यविशेषस्य। तेन मुद्गादिष्वतिप्रसङ्गो न भवति॥

---

1. इत्यपि ड. फ. 2. समाशब्दात् संवत्सरात् च फ. 3. द्विगोः इत्येव फ. 4. नित्यं प्राप्नोति इति विकल्प उच्यते क. 5. अस्ति एव नास्ति क. 6. तेन क, वाक्यमिदं नास्ति फ. 7. द्विगोरित्येव इत्यधिकम् क. 8. निर्वृत्ताद्यर्थेषु क. 9. ठञेव क, नास्ति फ. 10. वर्षशब्दान्तात् क. फ. ह. 11. तदेवं फ, एवं त्रैरूप्यं सम्पद्यते क. 12. सम्पद्यन्ते ब. ड. फ. ह. 13. द्वैवर्षिकः इत्यधिकम् ब. ह. 14. निर्वृत्तादिष्वर्थेषूत्पन्नस्य नास्ति ब. क. 15. त्रिवर्षो दारकः इत्यधिकम् ब. क. ड. फ. ह. 16. भवति क. ह. 17. शालयः इत्यधिकम् क.